CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जून २००३ ईसवीयाब्दः ओ३म् R.N.I. Regd No. UPBIL/1998/1485

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

'भारते भातु भारती'

मातर्वादय साम-तरङ्गम्

--डॉ० रामाशीषः पाण्डेयः
आचार्योऽध्यक्षश्च, संस्कृतविभागस्य
मारवाडी-महाविद्यालयः, राँची (झारखण्डम्)

(१)

वीणा तव बहुभावसाधिका
सकलजनेभ्यो मोददायिका ।
भावविभावैरनुभावैः किल
किरतु सकलदिशि नवरसगङ्गम् ॥
मातर्वादय साम-तरङ्गम् ।

(२)

विषमविचारः क्वापि वर्धते
दुष्ट-जनानां शक्तिरेधते ।
मानवता संकटयुक्ता यदि
समता-राग ध्वनयतु शीघ्रम् ॥
मातर्वादय साम-तरङ्गम् ।

(३)

बाला वयं तवामृतगानं
श्रुत्वान्तमुदिता नवभावम् ।
बन्धुत्वस्य प्रचारे लग्ना
येन भवेम ददातु ज्ञानम् ॥
मातर्वादय साम-तरङ्गम् ।

(४)

साम्यभावनवनिर्मितदीपे
दत्वा खलु बन्धुत्वस्नेहम् ।
दीपय दीपं यस्य प्रकाशे
पश्यामो नवविकसित-रूपम् ॥
मातर्वादय साम-तरङ्गम् ।

(५)

सा विद्या भुवने किल विलसतु
यत्र पठामो निजनवभावम् ।
मानवता-जागरण-दिशायां
पश्यामो निजविजयरथाङ्गम् ॥
मातर्वादय साम-तरङ्गम् ।

(६)

यत्र दृश्यते मनुज-विषमता
दानवता पीडित-मानवता ।
हिंसा धनजनपदमपहरणं
तत्र निनादय समतामन्त्रम् ॥
मातर्वादय साम-तरङ्गम् ।

[शेषांशः ७ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूरभाष- ०१३३४ { २५४२६५ / २५५३७७ (ज्वालापुरम्) तारगृहम् – महाविद्यालयः (ज्वालापुरम्)

भारतोदयः

संस्कृत-मासिकपत्रम्

वर्षम् – ६३ अङ्काः - १२

सम्पादकः

डॉ० हरिगोपालशास्त्री

व्याकरणाचार्यः

एम्०ए०, पीएच्० डी०

राष्ट्रपति-पुरस्कृतः

सह-सम्पादकः

डा० केशवप्रसाद उपाध्याय

साहित्याचार्यः

एम्० ए०, पीएच्० डी०

प्रबन्ध-सम्पादकः

डा० अजयकौशिकः

साहित्याचार्यः

एम० ए०, पीएच्० डी०

प्रकाशकः

गुरुकुलमहाविद्यालयः ज्वालापुरम्

हरिद्वारम्- २४६४०५

(उत्तराञ्चल-प्रदेशः)

शुल्क-विवरणम्

प्रत्यङ्कम्	—	५/-
वार्षिकम्	—	५०/-
आजीवनम्	—	५००/-

विषयानुक्रमणिका

१-श्रुतिसुधा	– महर्षिदयानन्दसरस्वती	३
२-वेदेषु प्राणिविज्ञानम्	—डॉ० मुकेशकुमारः	४
३-मातर्वादय सामतरङ्गम्	—डॉ० रामाशीषः पाण्डयः	७
४-श्रीराम-पञ्चामृतम्	—श्रीजयप्रकाशपाण्डेयः	८
५-श्रीमहाभारते वृक्षमाहात्म्यम्	–डॉ० द्वारिकाप्रसादःत्रिपाठी	१५
६-पुराणमित्येव न साधु सर्वम्	–डॉ० कमलनयनः शर्मा	१६
७-कोऽयम्	—डॉ० मनोहरलाल आर्यः	१९

वाग्वैभवम्

—प्राध्यापकः **सरयूप्रसादत्रिपाठी**

श्रीभुवनेश्वरी महेश्वरानन्द गुरुकुल संस्कृतमहाविद्यालयस्य

झलोखरस्थः, हमीरपुरम् (उ० प्र०)

ये वाचः सेवन्ते तानेवार्थाः सदाऽभिधावन्ति ।
शुकमयूरहंसेभ्यो वित्तं दीयते नैव काकेभ्यः ॥ १ ॥

आराध्य सुधीर्वाचं स्वयमतितरां रोचते सन्तुष्टः ।
मूर्धहतस्तननिर्गतपयसेव वत्सकोऽलम्परितुष्टः ॥ २ ॥

यानर्थान् वाग्दत्ते मनःसेविता सुचिरसुखान् महितान् ।
निर्निद्राखिलकरणैश्चिरसेवितोऽपि न तान् धनाध्यक्षः ॥ ३ ॥

दुर्मतिबन्धान् वाचो यथाहरन्ति न तु तथा देवोऽन्यः ।
तं सेन्वते सुधियो मनोमन्दिरे दीप्तां क्रामन्तः ॥ ४ ॥

अन्ये वरदा देवास्तुष्यन्ति गिरैवकलितसद्भावाः ।
अनादृत्य ता न किमपि लोके पशुरिव जनः क्षमो लब्धुम् ॥ ५ ॥

भगवदधीना वाचः स्यादेद् भगवानपि वाग्बद्धः ।
सद्गुरुमनुमनुगच्छन् धृतो ह्यसौ रहसि दृढं सद्विद्यैः ॥ ६ ॥

केचित्तां व्याकरणैः सेवन्तेऽन्ये काव्यालङ्कारैः ।
केऽप्यर्थपरिष्कारैर्वाक्यार्थशीलनैर्ज्ञाः केऽप्यन्ये ॥ ७ ॥

केचिद्धितार्थभावनविस्मृत-सकल-भुवन- लालित्यम् ।
आवर्तयन्ति वाचं यत्र स्फुरतितरां खलु जगदीशः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ओ३म् ॥

ज्वालापुरीय–गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भवभावनाभिलाषी ।
भगवति भुवि भक्ति-भावभाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख–ललाम–सञ्चय–प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

वर्षम्– ९३	ज्येष्ठ २०६० विक्रमाब्दः, जून २००३ ईसवीयाब्दः	अङ्कः – १२

श्रुति-सुधा

ओ३म् उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ।
शक्रो यथा सुतेषु णो रारणत् सख्येषु च ॥

–ऋग्वेद १/१०/५

पदार्थः —

(उक्थं) वक्तुं योग्यं स्तोत्रम् । अत्र 'पातृतुदि··· । उ० २/७' अनेन वचधातोः थक् प्रत्ययः । (इन्द्राय) सर्वमित्रायैश्वर्यमिच्छुकाय जीवाय । (शंस्यम्) शंसितुं योग्यम् । (वर्धनम्) विद्यादिगुणानां वर्धकम् । (पुरुनिष्षिधे) पुरूणि बहूनि शास्त्राणि मङ्गलानि च नितरां सेधतीति तस्मै । (शक्रः) समर्थः शक्तिमान् । (यथा) येन प्रकारेण । (सुतेषु) उत्पादितेषु स्वकीय–सन्तानेषु । (नः) अस्माकम् । (रारणत्) अतिशयेनोपदिशति । यङ्लुगन्तस्य 'रण' धातोर्लेट्प्रयोगः । (सख्येषु) सखीनां कर्मसु भावेषु, पुत्रस्त्रीभृत्यवर्गादिषु वा । (च) समुच्चयार्थे ॥ ५ ॥ अत्रोपमालङ्कारः ।

भावार्थः —

अस्मिन् जगति या या शोभा प्रशंसा ये च धन्यवादास्ते सर्वे परमेश्वरमेव प्रकाशयन्ते । कुतः ? यत्र यत्र निर्मितेषु पदार्थेषु प्रशंसिता रचना गुणाश्च भवन्ति, ते ते निर्मातारं प्रशंसन्ति । तथैवेश्वरस्यानन्ता प्रशंसा प्रार्थना च पदार्थ-प्राप्तये क्रियते । परन्तु यद्यदीश्वरात् प्रार्थ्यते, तत्तदत्यन्तस्वपुरुषार्थेनैव प्राप्तुमर्हति ॥ ५ ॥

–महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, प्रथमो भागः, ५७७ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदेषु प्राणिविज्ञानम्

—डॉ० मुकेशकुमारः, प्रवक्ता संस्कृतविभागे राजकीय— स्नातकोत्तर— महाविद्यालयः पिथौरागढ़नगरम् (उत्तराञ्चलराज्यम्)

संस्कृतभाषायामुपनिबद्धानां ग्रन्थानामाकरमेवाचक्षते संस्कृतवाङ्मयम्। विश्वस्य समस्तं ज्ञानं विज्ञानं च संस्कृतवाङ्मये समुपलभ्यते। संस्कृतवाङ्मयं किल द्वेधा विभज्यते वैदिकं लौकिकं चेति । तत्र वैदिके विश्ववाङ्मये चत्वारो वेदाः प्राचीनतमाः सन्ति, नात्र विदुषां विप्रतिपत्तिः ।

ब्रह्मण आजैमिनिमुनि येऽपि महर्षयो यं वेदसदनं निर्ममुः, तस्य तोरणद्वारि भगवतो मनोर्वाक्यमिदं राजतेतराम् **'वेदोऽखिलं धर्ममूलम्'**[1] अत्र हि तावत् वेदपदेन ऋग्यजुः सामाथर्वाख्योऽखिलशब्दश्च कृत्स्नता-द्योतकोऽस्ति प्रयुक्तश्च धर्मशब्दो वर्णाश्रमकर्त्तव्यानां बोधकः, तेषां कर्त्तव्यानां येषु परिवारस्य समाजस्य राष्ट्रस्य मानवस्य च जीवनं प्रतिष्ठते ।

वेदानामनुशीलनेनेदं जायते यत् वेदा एव सर्वेषां ज्ञानानां विद्यानां च स्रोतांसीति शास्त्राणि निगदन्ति । वेदाः ज्ञानराशित्वात् सार्वभौमिका ईश्वरोपदिष्टाः सर्वार्थसाधकाश्चेति वर्त्तन्ते । वेदेषु बीजरूपेण आध्यात्मिकम् आधिदैविकम् आधिभौतिकं चेति त्रिविधमपि विज्ञानं सुतरां संप्राप्यते ।

तदत्र वेदेषु भौतिक-रसायन-वनस्पति-चिकित्सा —भूगोल-खगोल-धातु —विज्ञानवत् प्राणिविज्ञानविषयस्यापि प्राचुर्यं दरीदृश्यते ।

अथ किमिदं प्राणिविज्ञानमिति जिज्ञासायामुच्यते प्राणिनां तेषां गुणानाम् पक्षाणां सूक्ष्मेक्षिकया अध्ययनं क्रियते यत्र तत् प्राणिविज्ञानमिति ।' यत्र 'प्राणिनां विशिष्ट—गुणेभ्योऽनेके लाभाः मानवाय कल्पन्तेतरामिति मनीषिणामभिमतमेतत् ।

वेदे तस्मात् यज्ञात् सर्वहुतः पृषदाज्यं ततश्च पशवः (प्राणिनः) अजायन्त। पुरुषसूक्त-दिशा हि तावत् त्रिविधं प्राणिजगदित—(१) वायव्यम् (२) आरण्यम् (३) ग्राम्यं चेति[2]

लोके तदस्ति किं ज्ञानं वदेषु यन्न विद्यते

वैदिकसाहित्ये षष्ट्युत्तरद्विशतप्राणिनामुल्लेखः, अथर्ववेदे च मनुष्येषु प्राणिषु च रोगोत्पादकाः सविषाः षोडशकृमयः सन्ति । केवलं यजुर्वेद एव एकषष्ट्युत्तरैकशताधिकप्राणिनां वर्णनं विद्यते । तदत्र चतुर्विंशतितमेऽध्याये तु प्राणिविज्ञानमेव विवेच्यते ।

तैत्तिरीयोपनिषदि समस्ता सृष्टिः तस्मात् परब्रह्मणः समुद्भूता वर्तते । यथा हि—

तस्माद् वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद् वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधिभ्यो ऽन्नम् । स वा एषः पुरुषोऽन्नमयः[3] ।

1— मनुस्मृति २/६ 2— ऋग्वेद १०/९०/८

3— तैत्तिरोयोपनिषद् ब्रह्मानन्दवल्ली प्रथमः अनुवाकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रैव पृथिव्यां सर्वे प्राणिनः अन्नादजायन्त। अन्नपरिणमनात् रसवीर्यं च तत एव शरीराणि समुदभवन्। अन्नेनैव तेऽपुष्यन्त[4] त एते प्राणिनश्चतुर्विधाः सन्ति[5]। परवर्त्तिसाहित्ये जरायुजाण्डजस्वेदजोद्भिज्जानामुल्लेखः प्राप्यते। पुराणसाहित्ये खलु चतुरशीतियोनीनामुल्लेखो विद्यते[6]।

जङ्गमाः खल्वपि चतुर्विधाः जरायुजाण्डज स्वेदजोद्भिज्जाः। तत्र पशुमनुष्यव्यालादयो जरायुजाः। खगसर्पसरीसृपप्रभृतयोऽण्डजाः। कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः। इन्द्रगोप-मण्डूकप्रभृतय उद्भिज्जाः।

इमे खलु प्राणिनः जन्मना चतुर्षु भागेषु विभज्यन्ते। तद्यथा-

(१) **जरायुजाः** —

मातुर्गभाज्जायन्ते त इमे मनुष्य पश्वादयः ये जरायौ[7] (गर्भावरणे) तिष्ठन्ति।

(२) **अण्डजाः** —

अण्डेभ्यः समुद्भूताः प्राणिनः पक्षिमत्स्यसर्पादयः सन्ति।

(३) **स्वेदजाः** —

मलमूत्रस्वेदेभ्यः प्रादुर्भुतं यूकाम-क्षिकामत्कुणम् इत्यादयः।

४-**उद्भिज्जाः** —

उद्भिज्जः जायन्ते ते इन्द्रगोप मण्डूकादयः प्राणिनः सन्ति।

यद्यपि चतुर्षु वेदेषु प्राणिविज्ञानं परिलक्ष्यते, तत्रापि यजुर्वेदस्य चतुर्विंशतितमोऽध्यायः विषये-ऽस्मिन् सर्वातिशयो राजतेतराम्। तत्र हि तेषां प्राणिनामनुगुणं मानवाय कथं ते लाभाय कल्पन्ते किं तच्च तेषु विज्ञानम्? इति सर्वमत्र समासेन विवेच्यते।

(१) **जरायुजप्राणिनः** –

यजुर्वेदे तावद् दृश्यत इत्थमुल्लेखो यत् भूमेरुत्कृष्टत्वं ज्ञानायाखुः, दिशां ज्ञानाय नकुलः, उपदिशां ज्ञानाय च बभ्रुः नाम नकुलश्च लाभाय कल्पन्तेतरामिति[8]। वेदे हि खल्वेकत्र मन्त्रे नकुलोऽहिं विच्छिद्य पुनः संदधाति[9], स चास्ति कस्यचिदोषधेः विज्ञः[10]।

4— तैत्तिरीयोपनिषद् ब्रह्मानन्दवल्ली द्वितीयः अनुवाकः।

5— (क) सुश्रुतसंहिता १/२६-२९ (ख) चरकसंहिता २६/३५-५४ (ग) मनुस्मृति १/४३-४५

6— दैवीभागवतम्।

सर्वे जीवाः मिलीत्वैव ब्रह्माण्डांशसमुद्भवाः। चतुरशीतिः लक्षाश्च प्रोक्ताः वै जीवजन्तवः॥
स्थावरे लक्षविंशत्यो कृमिजं रुद्रलक्षकम्। जलजं नवलक्षं च पक्षिजं दशलक्षकम्॥
पश्वादीनां लक्षत्रिंशच्चतुर्लक्षं च वानरे। ततो हि मानवाः जाताः कुत्सितादेर्विलक्षकम्॥
[२०+११+०९+१०+३०+०४=८४]

7— यजुर्वेद १९/७६ 'गर्भो जरायुणावृत उल्वं जहाति जन्मना।'

8— यजुर्वेद २४/२६ 'भूम्या आखूनालभते·····दिशाभ्यः।'

9— अथर्ववेद ६/१९३/५ 'यथा नकुलो विच्छिद्य संदधात्यहिं पुनः।'

10— अथर्ववेद ८/७/२३ 'नकुलो वेद भेषजीम्।'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यजुर्वेदे पशूनां गुणज्ञान् जनान् प्रति तदित्थं उपदिश्यते यत् 'अग्न्यादिवसुभ्य ऋष्यमृगान्, प्राणादिरुद्रेभ्यो रुरुमृगान्, चैत्रादिमासेभ्यो न्यंकुपशुविशेषान्, विश्वेभ्यो देवेभ्यः पृषत्मृगान्, साध्येभ्यश्च कुलुंगुपशुविशेषान् आलभते तथा यूयमपि समालभ्य लाभं प्राप्नुयात्। इत्थमेव च परस्वत् गोरमृगविशेषान् महिष—गवयोष्ट्रपशून् य आलभते स धनधान्ययुक्तो जायते[11]। कृकलासः[12] ('गिरगिट' जन्तुविशेषः) तद्गुणान् विज्ञाय मानवः कार्यं साधयेत्। श्रूयते खलु तद्विषये जनश्रुतिरेका खलु यत् तं वृश्चिकः कृन्तेत चेत् सोऽपामार्गं गच्छति, तत्रोपविशति, तं खादति च। येन सः पुनः निर्विषं जायते। एवं हि परेषामपि शिशुमार- (घडियाल) शार्दूल—गोमृगमेष इत्यादीनां जरायुजानां प्राणिनां गुणान् विज्ञाय तेभ्य उपकृताः स्युरिति वेदे समुल्लेखः।

(२) **अण्डजप्राणिनः** —

अण्डजप्राणिनां विषयेऽपि वेदेषु नानाविधं विज्ञानं प्राप्यते। यथा हि कर्पिजलान् वसन्ताय, कलविंकान् ग्रीष्माय, वर्षाभ्यस्तित्तिरान्, शरदे वर्तिकाः, हेमन्ताय ककरान्, शिशिराय विककरान् आलभन्ते[13]। अथर्ववेदे खल्वेकत्र विभिन्नप्रजातीनां सर्पाणां समुल्लेखो वरीवर्त्ति, प्रार्थ्यते च **मा स्युः उपगृहं हि नः**[14]।

एकत्र खलु सर्पिणीवर्णनं यत् सा कृन्तति चेत् कण्डूतिर्जायते।[15] वेदे हि सारिका—शुकयोः पुरुषवाक् इति विशेषणं प्राप्यते। येन हि प्रतिभाति यत् तौ खलु पक्षिणौ पुरुषवत् प्रवक्तुक्षमाविति। शारि (सारिका) विषये चैका जनश्रुति ख्याता यत् सा खलु सविषं भोजनं दृष्ट्वा व्याकुलीभवति। क्रौञ्च-हंसौ हि नीर-क्षीर —विवेकिनौ स्तः, वेदे समुल्लेखो **दरीदृश्यते**[16]। गृध्र-कपोत-सुपर्ण-श्येनादीनामपि विषये वेदे विद्यते विशिष्टोल्लेखः।

(१) **स्वेदजप्राणिनः** —

स्वेदजप्राणिनां विषयेऽथर्ववेदे हि तावत् वर्णनं समुपलभ्यते। अलगण्डून् (यूकामत्कुणम्) महता वधेन हन्मि दूना अदूनाः निर्बलम् अभूवन्, शिष्टान शिष्टान् वाचा नितरामि, येन हि कृमीणां न कश्चित् शिष्येत[17]।'

11— यजुर्वेद २४/२६—२८ 12— यजुर्वेद २४/४०

13— यजुर्वेद २४/२० 'वसन्ताय कर्पिजलान्.....विककरान्।'

14— अथर्ववेद ५/१३५ 'कैरात पृश्न.....रमध्वम्।'

15— अथर्ववेद ५/१३/८ 'उरुगूलाया दुहिता जाता.....विषम्।'

16— यजुर्वेद (क) 'अद्भ्यः क्षीरमपिबत् क्रुङ्।'

(ख) 'सोममद्भ्यो व्यपिबच्छन्दसा हंस शुचिषत्।'

17— अथर्ववेद २/३१/३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(४) उद्भिज्जप्राणिनः —

उद्भिज्जप्राणिषु विद्यते तावत् मण्डूकः प्रमुखः, तस्य विविधक्रियाकलापैः वृष्टिविषयकं विज्ञानं तत्र प्राप्यते । अथर्ववेदस्य मण्डूकसूक्ते वर्षासु परिसमाप्तासु तावत् सानन्दं ऋषिरेवमुवाच– **'व्रतचारिणो ब्राह्मणा इवामी मण्डूका आवर्षं व्रतं चरन्तः तत्समाप्य बहिराउच्छन्, प्रावोचन् च ।'** तत्रैव पुनः अतिवर्षाभ्य ऋषिः मण्डूकेभ्यः प्रार्थयन् प्रोवाच– 'हे मण्डूकाः ! हे तादुरि ! वर्षामावद ह्रदस्य मध्ये चतुरः पदः विगृह्य प्लवस्व[18] ।' प्रतिपादितं हि तत्र खलु प्रकृतौ मानवाय ओषधिभ्यो वनस्पतिभ्यश्च महत्त्वमिति ।

अत्र हि खलु चतुर्विधप्राणिषु तावत् केषाञ्चिदेव प्राणिविशेषानां विषये संक्षेपेण वर्णितम् । अमीषां हि प्राणिनां मानवजीवनेऽति महत्त्वं विद्यते । वैदिक–समाजः विविधप्राणिविद् आसीदिति वेदेषु सम्यक् प्रतिपादितम् । तत्र हि यत् प्राणिविज्ञानं प्राणिषु दरीदृश्यते, तेन मानवः स्वस्य समाजस्य राष्ट्रस्य पर्यावरणस्य चानेकान् लाभान् प्राप्नोति । वैदिकः ऋषिस्तावत् **'अभयं नः पशुभ्यः'** इति प्रार्थयति । भारतीय–समाजे पञ्चमहायज्ञेषु भूतयज्ञस्य परिकल्पनापि प्राणिनां संवर्द्धनस्य शिक्षां सदैव प्रददाति । अनुभवामस्तावत् **'यतः प्राणिनः विना नास्ति मानव–जीवने सुखं शान्तिश्च ।'** इति वेदानामभिमतम् । पुनरिदमेव प्रार्थयामः चान्ते **सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥**

✱

18— अथर्ववेद ४/१५/१४

(शेशांष पृथम पृष्ठस्य)

मातर्वादय सामतरङ्गम्

(७)

साममुखैर्मधुरान्वितवचनै–
गायामस्तव नवनवगानम् ।
षडजर्षभगान्धारमध्यमं
पञ्चमधैवतमखिलनिनादम् ॥
मातर्वादय साम–तरङ्गम् ।

(८)

कश्चन मनुजो मिथ्याभावै
रावणायते विस्तृत–भूमौ ।
भौतिकता–कूपे मग्नोऽसौ
ध्रुवं ताडयति मदनमृदङ्गम् ॥
मातर्वादय साम–तरङ्गम् ।

(९)

ओसामाविनलादनसदृशः
कोऽपि मानवः पीत्वा भङ्गम् ।
शान्ति नाशने भवति तत्पर—
स्तस्याज्ञानं व्यपनय तूर्णम् ॥
मातर्वादय सामतरङ्गम् ।

(१०)

क्षेत्र–धर्म–वर्गादिविषमता
क्वापि दृश्यते मानव–भूमौ ।
समतातार–विनिः सृतनादैः
तामपनय कुरु शुभद्--प्रचारम् ।
मातर्वादय साम–तरङ्गम् ॥

(११)

वैषम्यस्य रसालं जग्ध्वा
नरा भवन्त्यातंङ्कवादिनः ।
उग्रवादिनो यत्र भूतले
कुरु समतारसयुक्तरसाङ्गम् ॥
मातर्वादय साम–तरङ्गम् ।

(१२)

सत्य–चिन्तनं सत्य–भाषणं
सत्कार्ये मानवनियोजनम् ।
येन जायते भुवने सहजं
तथा प्रकाशय सत्सन्ध्यङ्गम् ॥
मातर्वादय साम–तरङ्गम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीराम—पञ्चामृतम्

—श्रीजयप्रकाशपाण्डेयः,
विभागाध्यक्षः (साहित्यम्)
श्री दुर्गा जी संस्कृत महाविद्यालयः
चण्डेश्वर, आजमगढ (उ० प्र०)

(१)

नमो नमस्ते श्रीराम !, आनन्द-वर्धनाय च ।
रूपकिशोर—नन्दाय, योगाधिपताये नमः ॥

(२)

आंवलखेड़ा च वास्तव्यः, दानि कुंवरि सुताय च ।
शैशवत्वं व्यतीताय, नमः ज्ञानाय हेतवे ॥

(३)

भगवती-पतये राम, ब्रह्मविद्या--प्रदायिने ।
नमो कुशाग्रबुद्धाय, द्विजाधिपतये नमः ॥

(४)

जन्मना ज्ञान—युक्ताय, तपश्चर्या-रताय च ।
नमस्ते मोह-भङ्गाय, गायत्री-पूजकाय च ॥

(५)

मनःवाक्-कर्मजं विप्रं, ज्ञानिनामग्रजीवनम् ।
मानवधर्म-रते रामं, तं वन्दे लोक-पावनम् ॥

(६)

इदं रहस्यं परमं पवित्रं,
यमुना-तटे स्थितभूमिभागे ।
निर्माणकार्यक्रम—धर्मकार्यं,
करोति यः तं पुरुषं नमामि ॥

(७)

दुर्वासा तपसा याता, या भूमिः लोक-मङ्गला ।
विख्याता गुर्वी नाम्ना वै, 'युग-निर्माण योजना' ॥

(८)

एषु निर्माण-कार्येषु, संलग्नाः विविधाः नराः ।
सा भूमिः वन्दनीया तु, तत्रैव तपसे स्थितः ॥

(९)

गायत्री लोकमाता च, गायत्री लोक-पावनी ।
तत्र चाऽराधने श्लिष्टः, श्रीराम-चरणं नुतः ॥

(१०)

आराधिका हि वेदानां साधिका लोकपावनी ।
दास्यतां भजते लोकाः, मनुजाय गुरवे नमः ॥

(११)

स्पृहा-लोलुपताहीनः, दाने यः सततं रतः ।
गायत्र्याऽऽराधने लग्नः, तं गुरुं प्रणमाम्यहम् ॥

(१२)

हिमाद्रेः संभूता परम-रमणीया भगवती,
तपसि या संप्राप्ता, सुखद-रमणीयं शिवपदम् ।
स्थिता रूपानेका, विलसति शिवाङ्के शुभप्रदा
विनश्यतु मोहान्धं, भवतु हृदि लोके तव पदम् ॥

(१३)

तया दृष्ट्या प्राप्तं, परम-रमणीया भगवती,
ह्यभूतं वैराग्यं, वयसि प्रथमे मोह-विषये ।
परित्यक्तं गेहं, वसति च यः वैराग्य- भवने,
भजन्तं श्रीरामं, भवतु हृदि लोके तव पदम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१४)

जनानां कल्याणं, भवतु यजनं यस्य भवने,
हरिद्वारे व्याप्ता, दिशि दिशि शुभा कीर्तिरतुला ।
अखण्डं पुण्यानां, फलमिव च तद् ज्ञानमनघं,
भजन्तं श्रीरामं, भवतु हृदि लोके तव पदम् ॥

(१५)

ब्राह्मणाः क्षत्रियाः वैश्या,: मध्ये शूद्रास्तथैव च ।
कुर्वन्ति यजनं तत्र, ध्यायन्तं निरतं सदा ॥

(१६)

जीवन्ति मानवाः तत्र, देवलोके स्थिता इव ।
ध्यायद्भिः योगिभिश्चैव, व्याप्ता भूमि मनोरमा ॥

(१७)

पुण्यार्जनाय तिष्ठन्ति, सात्विकाहार-संयुताः ।
आस्वादयन्ति ते नित्यं, श्रीरामस्य पञ्चामृतम् ॥

(१८)

ध्यायं ध्यायं हिमगिरेः, स्मारं स्मारं सरोवरम् ।
पूतानि यानि तीर्थानि, पवित्राश्च महर्षयः ॥

(१९)

गायत्री-नामकं तीर्थं, पुण्यं पापविनाशनम् ।
शान्तिकुञ्जे वसन् विप्राः, मुच्यन्ते सर्व-किल्विषैः ॥

(२०)

आध्यात्म-नैतिकीं शिक्षां, शिक्षयन्ति सदा जनाः ।
ज्ञान-भा-भासिताः लोके, सर्वत्र भुवि-मण्डलम् ॥

(२१)

यज्ज्ञानं निर्मलं सूक्ष्मं, ब्रह्मवर्चस-तत्परम् ।
प्रभा-पुञ्ज इवाभाति, नहि तद् विद्यतेऽपरम् ॥

(२२)

धर्मार्थ— काम-मोक्षाय, विन्दते परमं पदम् ।
तद् फलं लभते जीवाः, ह्याश्रमे निवसन् मुदा ॥

(२३)

आश्रमात् ज्योतिः निर्गच्छन्, ज्ञान-विज्ञानसूचकाः ।
ज्ञान—संवर्धिनी ज्ञेया, योग—संसिद्धि-हेतवे ॥

(२४)

ज्ञानात् सर्वमवाप्नोति, ध्यानात् प्राप्नोति चेश्वरम् ।
ईश्वरात् मोक्षमाप्नोति, नित्यानन्द-निरञ्जनम् ॥

(२५)

वीतरागेन यः पूतः, यः पूतः निष्परिग्रहात् ।
यः पूतः भक्ति-भावेन, रामं तं संस्मरेत् सदा ॥

(२६)

सर्व-शक्तिमयं देवं, शाश्वतं ज्योतिमुत्तमम् ।
अव्यक्तं हि क्षमाशीलं, भगवतीपतिमीश्वरम् ॥

(२७)

सत्—युग-स्थापकं वन्दे, ज्ञानयोगमुपासकम् ।
धर्म—ज्ञान—समुद्भूतं, सर्वपापविनाशकम् ॥

(२८)

तेजोल्लासित-सर्वाङ्गं, कन्दमूल-फलाशिनम् ।
आराध्यः सर्वभूतानां, तं वन्दे योगमीश्वरम् ॥

(२९)

अखण्डं फलपुण्यानां, यः करोति सदा शिवम् ।
विष्णुरंशेन सम्भूतं, तं वन्दे हर्षवर्धनम् ॥

(३०)

आलोक्य रामं पुरुषं वरेण्यं,
सुशीतलं सुखिनः ये विदग्धाः ।
ताप-त्रयं नश्यति तत्क्षणं हि,
श्रीरामपादं नितरां भजामि ॥

(३१)

शरण्यानां शरणत्वं च, त्वमेव परमेश्वर ! ।
तेषां करोति कल्याणं, ये भक्त्या त्वामुपासते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

(३२)

एको रसः सर्वभूतेषु गूढः
सर्वेश्वरः सर्वभूतान्तरात्मा ।
सर्व-व्यापी चक्षुषा दृष्यमानः,
बीजं विश्वं विश्वदेवः स एकः ॥

(३३)

प्रज्ञावतारः मानसे चावतारः,
सत्पात्रता-संवर्धन-कारणश्च ।
स्वयंप्रभः विमलः धाममेकः,
विश्वेशः कारणं कारणश्च ॥

(३४)

हिमालये ध्यान-निमग्न-चेतः,
ध्यायन् सवित्रीं समुपासते यः ।
रामाभिधेयं रमणीय-देहिनं,
भजामि नित्यं न परान् भजिष्ये ॥

(३५)

ध्यात्वा सरस्वतीं देवीं, ध्यात्वा गुरुपदाम्बुजम् ।
ध्यात्वा च पितरौ पादौ, ध्यात्वा सर्वान् गुरूनपि ॥

(३६)

श्रीराम—महाभाग!, जाने त्वं परमेश्वरम् ।
अजानता मया किञ्चित् उक्तं तत्क्षन्तुमर्हसि ॥

(३७)

देवं जानामि पुरुषं त्वां, श्रियं भगवतीं शुभाम् ।
अज्ञानस्य विनाशाय, त्वं जातं प्रणयार्थितम् ॥

(३८)

यन्नामस्मृतिमात्रेण, संसारार्णवं तितीर्षति ।
दुर्जनः परमं धाम, सत्वरं सत्यमाप्नुते ॥

(३९)

क्व राम-चरितं दिव्यं, क्व चाल्पविषया मतिः ।
वर्णनेच्छा च तृष्णा मे, तितीर्षुः सागरमिव ॥

(४०)

तपस्वी ज्ञान- निष्ठस्य, संश्रुत्य जनतः श्रुतिः ।
पिबन्तु चाखिलाः लोकाः, श्रीरामस्य पञ्चामृतम् ॥

(४१)

मनः लोलायते नित्यं, तद्गुणस्यानुवर्णने ।
काव्यत्वशक्ति दुस्तीर्य, प्रज्ञाहीनश्च मे मतिः ॥

(४२)

हठतः बाधते मां च, तच्चरित्रानुवर्णने ।
यथा बुद्ध्या यथा ज्ञानं, श्रद्धयोट्टङ्कितं मया ॥

(४३)

एतत्ते कथितं भक्त्या, श्रीरामस्य पञ्चामृतम् ।
अति गुह्यतमं लोके, पवित्रं पाप-शोधनम् ॥

(४४)

साक्षात् कथितं देव्या, सर्व-वेदान्त-संग्रहम् ।
यः पठेत् सततं नित्यं, स मुक्तो नात्र संशयः ॥

(४५)

पश्यन्ति ये सर्वदुःखं विहाय,
प्रज्ञा-धनं सत्यमनन्तमेकम् ।
अखण्ड-रूपं परमं प्रकाशं,
तेषां हृदब्जे वस शान्तिदूतम् ॥

(४६)

त्वमेव सर्वलोकानां, शान्तिस्थापनमुत्तमम् ।
एवं स्थानं मह्यं देहि, दानि कुँवरि नन्दन ! ॥

(४७)

धर्माधर्मान् परित्यज्य, त्वामेव भजतोऽनिशम् ।
भगवत्या सह श्रीराम, वस सुखं मान-मन्दिरम् ॥

(४८)

गायत्री-जापको यस्तु, गायत्री-शरणं गतः ।
मुच्यते सर्व-पापेभ्यः, मोक्षपदवीमवाप्तवान् ॥

[शेषांशः १५ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री महाभारते वृक्षमाहात्म्यम्

—डॉ० द्वारिकाप्रसादः त्रिपाठी
बिडलापरिसरस्थस्य संस्कृतविभागाचार्यः
हेमवतीनन्दन बहुगुणा गढवालविश्वविद्यालयः
श्रीनगरम्, गढ़वालम् (उत्तराञ्चलम्)

जोव-परिवेशशुद्ध्यर्थं वृक्षादिवनस्पतीनां बहु माहात्म्यमस्ति। एते जीवान् बहूपकुर्वन्ति। वृक्षादि—वनस्पतयो वायुमण्डलाद् विषरूपं प्राणघातकमशुद्धवायुं शङ्करवत् कण्ठे धृत्वा जीवेभ्यः सततं प्राणरक्षकं कल्याणकरं प्राणवायुं ददति। एते हि प्राणिभ्यो भोजनं छायाम् औषधं मनोरञ्जनम् आश्रयञ्च दत्त्वा किं किं नोपकुर्वन्ति ? सर्वथोपकुर्वन्ति प्राणिनः। वृक्षादिवनस्पतयो जीवपरिवेशस्य महीयोऽङ्गमस्ति वृक्षते वृणुते स्नेहातिरेकेण प्राणिनो यः स वृक्षोऽस्ति।

भ्वादिगणपठिताद् **'वृक्ष वरणे'** इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (३-१-१३४) इति पाणिनीयाष्टकसूत्रेणाऽच्-प्रत्यये सति वृक्षशब्दो व्युत्पद्यते। वृक्षो हि नाम वनस्य=जलस्य, पतिः=रक्षको भवति, अत एव वृक्षो वनस्पतिरपि कथ्यते। जीवा अनेन नदीं तरन्ति, अथवा एष जीवान् संकटात् तारयति। अत एवैष संस्कृतभाषायां तरुः, अङ्गे जीभाषायां च ट्री (Tree) इति कथ्यते। शाखा अस्य सन्तीति कारणाच्छाखी निगद्यते। एष पादैर्जलं पबति, अतः पादप उद्यते। एतस्मिन्नोषो दीप्तिर्धीयते, अत एष ओषाधिरपि ब्रूयते। एषोऽनसाम् अकं=गतिं हन्ति, अत एवाऽनोकहः कथ्यते। मह्यां रोहणादसौ महीरूह उच्यते। एष हि विटं=भूम्या विस्तारं पाति, अतो विटपः कथ्यते। करुणपूर्वकं द्रवणादसौ द्रुमो निगद्यते।

श्रीमहाभारते यत्र तत्र वृक्षस्य तत्समष्टि-रूपस्य च वनस्य बहु माहात्म्यं गीतं दृश्यते। श्रीमहाभारत उद्योगपर्वान्तर्गतप्रजागरपर्वणि विदुर नीतौ वृक्षं वनञ्चाश्रित्य बहवः श्लोकाः सन्ति। ते वृक्षवनमाहात्म्यं पारिवेशिकसिद्धान्तांश्च प्रकटयन्ति। तत्र लिखितमस्ति यद्-'यो जनो वनस्पतेरपक्वानि फलानि प्रचिनोति, स तेभ्यो रसं न प्राप्नोति, च बीजानि अनेन कुकृत्येन स बीज नाशं करोति। यो जनः काले परिणतानि फलानि वनस्पतिभ्य उपादत्ते, स तेभ्यो रसमपि बीजानि चाऽपि प्राप्नोति। स हि बीजेभ्यः पुनः वनस्पती-नुत्पाद्य तेभ्यो नवीनेभ्यो वनस्पतिभ्यः फलानि प्राप्नोति। इत्थं वनस्पति-प्रसारं कृत्वा विवेकी जनः सर्वदैव फलानि प्राप्नोति। यथा—

(१५)

वनस्पतेरपक्वानि फलानि प्रचिनोति यः।
स नाप्नोति रसं तेभ्यो बीजं चाऽस्य विनश्यति॥

(१६)

यस्तु पक्वमुपादत्ते काले परिणतं फलम्।
फलाद् रसं स लभते, बीजाच्चैव फलं पुनः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उक्तौ श्लोकौ भाण्डारकर-प्राच्य विद्या-मन्दिरेण पुण्यनगरस्थेन प्रकाशिते श्रीमहाभारते उद्योगपर्वणि प्रजागरपर्वणि विदुरनीतौ ३४ तमेऽध्याये १४१ तमे पृष्ठे स्तः।

महामतेर्नीतिज्ञस्य विदुरस्य जनेभ्यः सदुपदेशोऽस्ति यज्—

'जनाः स्वोपयोगाय वृक्षान् पुष्पफलादीनि वस्तूनि विवेकपूर्वकं दुह्यः। यथा भ्रमरः पुष्पाणि रक्षन् तेभ्यो मधु समादत्ते तथैव जना अपि कुर्युः। यथाऽऽरामे मालाकारो वृक्षाणां मूलमच्छित्त्वा पुष्पं पुष्पं विचिन्वति, तथैवाऽन्ये जना अपि कुर्युः। यथाऽङ्गारकारकः समूलान् वृक्षान् छिनत्ति तथा कदापि न कुर्युः' इति। यथा—

(१७)

यथा मधु समादत्ते रक्षन् पुष्पाणि षट्पदः।
तद्वदर्थान् मनुष्येभ्य आददद्यादविहिंसया॥

(१८)

पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्।
मालाकार इवारामे न यथाऽङ्गारकारकः॥

—श्रीमहाभारत उद्योगपर्वणि प्रजागरपर्वणि विदुरनीतौ ३४ तमेऽध्याये १४१ तमपृष्ठस्थे

अत्रैव कथितं यद्-'धार्तराष्ट्रा दुर्योधनादयो वनं, तत्र पाण्डुपुत्रा युधिष्ठिरादयो व्याघ्राः सन्ति। स व्याघ्रं वनं राजन्! मा छिन्धि। व्याघ्रानपि मा वनान्नीनशः, व्याघ्रान् ऋते वनं सुरक्षितं न भवति। वनम् ऋते व्याघ्रा अपि सुरक्षिता न भवन्ति। व्याघ्रा वनं रक्षन्ति। वनञ्च व्याघ्रान् रक्षति' इति। वनसंरक्षणार्थं विदुरनीतेरेतदा-शयकाः श्लोकाः पठनीया रटनीया मननीयाः श्रवणीयाः श्रावणीयाश्च सन्ति।

एभिः श्लोकैः परिवेशविद्यायाः = 'इकोलजी' इति विद्याया अन्योऽन्याश्रयसिद्धान्तः = 'इको सिष्टम' इति सिद्धान्तो ध्वन्यते। श्लोका इमे सन्ति—

(४१)

धार्तराष्ट्रा वनं राजन्! व्याघ्राः पाण्डुसुता मताः।
मा वनं छिन्धि सव्याघ्रं मा व्याघ्रान्नीनशोवनात्॥

(४२)

न स्याद् वनमृते व्याघ्रान् व्याघ्रा न स्युर्ऋते वनम्।
वनं हि रक्ष्यते व्याघ्रैर्व्याघ्रान् रक्षति काननम्॥

—श्रीमहाभारते ..... विदुरनीतौ ३५ तमेऽध्याये १७२-७३ तमपृष्ठस्थे

श्रीमहाभारते पुनः कथितं यत्-'लता महाद्रुमं विना न वर्धते' इति। अनेन कथनेन वृक्षमाहात्म्यम् इकोलजी—विद्यायाश्च पराश्रयता सिद्धान्तो ध्वन्यते। जीवः स्वपर्यावरणमाश्रयते। लतायाः पर्यावरणं वृक्षोऽस्ति। श्लोक एतदाशयक एषोऽस्ति—

(५९)

लताधर्मा सपुत्रस्त्वं शालाः पाण्डुसुता मताः॥

(६०)

न लता वर्धते जातु महाद्रुममनाश्रिता॥

—उक्तग्रन्थे १७४ तमे पृष्ठे

श्रीमहाभारते पुनः कथितं यत्- 'सपुत्र आम्बिकेयो धृतराष्ट्रो वनमस्ति। तस्मिन् धृतराष्ट्ररूपे वने पाण्डवाः सिंहाः सन्ति। सिंहैर्विना वनं विनश्यति, वनं विना च सिंहाः विनश्यन्ति। यथा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(६०)

वनं राजंस्त्वं सपुत्रोऽम्बिकेयः
सिंहान् वने पाण्डवांस्तात विद्धि ।
सिंहैर्विहीनं हि वनं विनश्येत्
सिंहा विनश्येयुर्ऋते वनेन ॥

—उक्तग्रन्थे १७३ तमे पृष्ठे

अनेन श्लोकेनाऽपि इकोलजीति विद्यायां अन्योन्याश्रयसिद्धान्तः सूच्यते ।

श्रीमहाभारते व्याघ्रवनपरका बहवः अन्येऽपि श्लोकाः सन्ति । यथा—

(१७)

वनं राजा धृतराष्ट्रः सपुत्रो
व्याघ्रा वने संजय पाण्डवेयाः ।
मा वनं छिन्धि सव्याघ्रं
मा व्याघ्रान्नीनशो वनात् ॥

(४८)

निर्वनो वध्यते व्याघ्रो निर्व्याघ्रं छिद्यते वनम् ।
तस्माद् व्याघ्रो वनं रक्षेद् वनं व्याघ्रं च पालयेत् ॥

(४९)

लताधर्मा धार्तराष्ट्राः शालाः संजय पाण्डवाः ।
न लता वर्धते जातु अनाश्रित्य महाद्रुमम् ॥

—उक्तग्रन्थे सञ्जययानपर्वणि २९ तमेऽध्याये १०९ तमपृष्ठस्थे

एते त्रयः श्लोका गोरक्षपुरस्थगीताप्रेसेन प्रकाशिते श्रीमहाभारते २११४ तमे पृष्ठे किञ्चित् पाठभेदेन सह द्रष्टुं शक्यते ।

श्रीमहाभारतेऽनुशासनपर्वान्तर्गतदानधर्मपर्वणि नवनवतितमेऽध्यायेऽपि वृक्षाणां बहुमाहात्म्यं निरूपितमस्ति । तत्र वृक्षरोपणं पुण्यतमं कर्म कथितम् । तत्र लिखितमस्ति यत्- 'स्थावराणां भूतानां वृक्षगुल्मलतावल्लीत्वक्सारतृणेति षड्-जातयो भवन्ति । वृक्षादीनां रोपणेन बहवो गुणाः सन्ति । वृक्षाणाँ रोपणेन मानवस्येह लोके कीर्ति-र्भवति, प्रेत्य च स स्वर्गे शुभं फलं लभते । परलोके पितरस्तस्य सम्मानं कुर्वन्ति । वृक्षरोपी जनोऽतीतानागतान् स्ववंशजान् दुःखसागरात् तारयति । वृक्षा वै वृक्षरोपकस्य पुत्रा एव भवन्ति यथा पुत्रैः पिता पुत्री=पुत्रवान् कथ्यते, तथैव वृक्षैरपि स पुत्री=पुत्रवान् कथ्यते । वृक्षाः पुष्पैः सुरान्, फलैः पितॄन्, छायया चाऽतिथीन् पूजयन्ति किन्नरा उरगा रक्षांसि देवा गन्धर्वा मानवा ऋषयश्च वृक्षान् संश्रयन्ति । पुष्पिताः फलवन्तश्च वृक्षा मानवान् तर्पयन्ति । यो मनुष्यो वृक्षदानं करोति, तं मनुष्यं वृक्षाः पुत्रवत्तर्पयन्ति परलोके । तडागस्य समीपे वृक्षा अवश्यमेव रोप्याः पाल्याश्च । धर्मतो वृक्षाः पुत्रा एव सन्ति' इति । एतदाशयका महाभारतोक्ताः श्लोका इमे सन्ति । यथा—

भीष्म उवाच

(२२)

अत ऊर्ध्वं प्रवक्ष्यामि वृक्षाणामपि रोपणं ॥

(२३)

स्थावराणां च भूतानां जातयः षट् प्रकीर्तिताः ।
वृक्षगुल्मलता—वल्ल्यस्त्वक्सारास्तृण—जातय ॥

(२४)

एता जात्यस्तु वृक्षाणां तेषां रोपे गुणास्त्विमे ।
कीर्तिश्च मानुषे लोके प्रेत्य चैव फलं शुभम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२५)

लभते नाम लोके च पितृभिश्च महीयते ।
देवलोकगतस्यापि नाम तस्य न नश्यति ॥

(२६)

अतीतानागते चोभे पितृवंशं च भारत ।
तारयेद् वृक्षरोपी च तस्माद् वृक्षान् प्ररोपयेत् ॥

(२७)

तस्य पुत्रा भवन्त्येते पादपाः नात्र संशयः ।
परलोकगतः स्वर्गं लोकांश्चाप्नोति सोऽव्ययान् ॥

(२८)

पुष्पैः सुरगणान् वृक्षाः फलैश्चापि तथा पितॄन् ।
छायया चातिथींस्तात पूजयन्ति महीरुहाः ॥

(२९)

किंनरोरगरक्षांसि देवगन्धर्वमानवाः ।
तथा ऋषिगणाश्चैव संश्रयन्ति महीरुहान् ॥

(३०)

पुष्पिताः फलवन्तश्च तर्पयन्तीह मानवान् ।
वृक्षदं पुत्रवद् वृक्षास्तारयन्ति परत्र च ॥

(३१)

तस्मात्तडागे वृक्षा वै रोप्याः श्रेयार्थिना सदा ।
पुत्रवत्परिपाल्याश्च पुत्रास्ते धर्मतः स्मृताः ॥

—श्रीमहाभारतेऽनुशासनपर्वणि
९९ तमेऽध्याये ५२१–२२ तमपृष्ठस्थे

श्रीमहाभारते शान्तिपर्वान्तर्गतराजधर्मानुशासनोपपर्वणि भीष्मेन युधिष्ठिराय दत्तानाम् उपदेशानां संग्रहोऽस्ति । भक्ष्यफलानां वनस्पतीनां महत्त्वं कुरुवृद्धपितामह सम्यग् जानाति स्म, अत एव स युधिष्ठिरायोपदिष्टवान् यद्— 'हे युधिष्ठिर ! तव राज्ये केऽपि भक्ष्यफलान् वनस्पतीन् न च्छिन्द्युः । तेषां मूलानि फलानि च ब्राह्मणानां धनानि भवन्ति । मूलेभ्यः फलेभ्यश्च ब्राह्मणानां धर्मकार्यं निष्पन्नं भवति इति । यथा—

(१)

वनस्पतीन् भक्ष्यफलान् न च्छिन्द्युर्विषये तव ।
ब्राह्मणानां मूलफलं धर्म्यमाहुर्मनीषिणः ॥

—श्रीमहाभारते शान्तिपर्वणि
राजधर्मानुशासनपर्वणि ९०
तमेऽध्याये ४२५ तमपृष्ठस्थे

भीष्मो युधिष्ठिराय कथितवान् यद्– 'हे युधिष्ठिर ! राजा महावृक्षवज्जायते वर्धते च तं चैव सर्वे प्राणिनः समाश्रयन्ति । यदा महावृक्ष इव राजा छिद्यते दह्यते वा, तदा तदाश्रिताः सर्वे प्राणिनो निकेतरहिता भवन्ति' इति । यथा–

(२५)

महावृक्षो जायते वर्धते च
तं चैव भूतानि समाश्रयन्ति ।
यदा वृक्षश्छिद्यते दह्यते वा
तदाश्रया अनिकेता भवन्ति ॥

—उक्तग्रन्थे ४३६ पृष्ठे ९२ तमेऽध्याये

अनेन श्लोकेन वृक्षमाहात्म्यं स्पष्टमेवाऽस्ति ।

अश्वत्थ-वृक्षस्य श्रीमहाभारते बहुमाहात्म्यं कथितम् । अश्वत्थमाहात्म्यद्योतकाः श्रीमहाभारतोक्ताः केचन श्लोकाः प्रस्तूयन्तेऽत्र । यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भगवान् उवाच

(३१२५)

अश्वत्थदर्शने चैव तथा मद्दर्शनेऽपि च ।
जप्त्वा तु मम गायत्रीमथ वाष्टाक्षरं नृप ! ।
अर्जितं दुष्कृतं तस्य नाशयेन्नाऽत्र संशयः ॥

युधिष्ठिर उवाच

अश्वत्थदर्शनं चैव किं त्वद्दर्शनसम्मितम् ।
एतत् कथय देवेश ! परं कौतूहलं हि मे ॥

भगवान् उवाच

(३१३०)

अहमश्वत्थरूपेण पालयामि जगत्त्रयम् ।
अश्वत्थो न स्थितो यत्र नाऽहं तत्र प्रतिष्ठितः ॥
यत्राऽहं संस्थितो राजन्नश्वत्थश्चापि तत्र वै ।
यस्त्वेनमर्चयेद् भक्त्या स मां साक्षात् समर्चति ॥

(३१३५)

यस्त्वेनं प्रहरेत् कोपान्मामेव प्रहरेत्तु सः ।
तस्मात् प्रदक्षिणं कुर्यान्न छिन्द्यादेनमन्वहम् ॥

भाण्डारकर-प्राच्यविद्या-संशोधनमन्दिरेण पुण्यनगरस्थेन प्रकाशिते श्रीमहाभारते आश्वमेधिक पर्वणि ४५२ तमपृष्ठस्थे Appendex 1, 4 इत्यत्र दर्शनीयाः श्लोकाः सन्ति ।

एभिः श्लोकैः स्पष्टं भवति यद् अश्वत्थवृक्षो हरिरेव साक्षात् । तद्दर्शनं हरिदर्शनमेव । यः कोऽपि जनोऽश्वत्थं छिनत्ति स महापापं करोति । श्रीमहाभारतेऽन्येऽपि बहवः सन्दर्भाः सन्ति वृक्षमाहात्म्यपरकाः । संस्कृत-विद्वांसस्तान् यथास्थानं पश्येयुः । ※

[१० पृष्ठस्य शेषांशः]

श्रीराम-पञ्चामृतम्

(४९)

ध्यानं कुर्वन्ति ये जीवाः, ये जीवाः त्वामुपासते ।
पारं हि ते सर्वं यान्ति, प्राप्नुवन्ति तव सङ्गमम् ॥

(५०)

सर्वदा सुख-दुःखाभ्यां, हर्ष-शोकमवाप्नुते ।
शरीरं पुण्य-पापाभ्यामुत्पन्नं सुख-दुःखयोः ॥

(५१)

अतो ते भक्ति-योगेन, ज्ञानं विज्ञानमेव च ।
वैराग्यं च भवेत् शीघ्रं ततो मुक्तिमवाप्नुयात् ॥

(५२)

यः इदं तु पठेत् नित्यं, श्रद्धाभक्ति-समन्वितः ।
अज्ञान-शमनं यान्ति, ज्ञानं शीघ्रमवाप्नुयाल् ॥

(५३)

पञ्चामृतं पातु कर-द्वयं मे,
पादारविन्दार्चनमेव कुर्यात् ।
शिरश्च ते पादयुगं प्रणामं,
करोतु नित्यं भवदीयगेत्र ॥

(५४)

इदं स्तवं नित्यमनन्यभक्त्या,
शृण्वन्ति गायन्ति लिखन्ति ये वै ।
ते सर्व—सौख्यं परमं च लब्ध्वा,
भवत्पदं यान्तु भवत्प्रसादात् ॥

★ ★ ★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुराणमित्येव न साधु सर्वम्

—डॉ० कमलनयनः शर्मा
६४५/ ए, सूर्यनगरम् (गोपालपुरा बाई पास)
जयपुरम्—३०२०१५ (राजस्थानम्)

उक्तिरियं सम्प्रति विद्यमानेषु कविषु महतो महतां कवीनां कविकुलगुरुपदवीकानां महामनसाम्। सम्प्रति न तादृशः काव्यकला-कलितः कोऽपि प्रतिभाति कविः। अतएव वदन्ति विद्वांसः 'अस्मात् पूर्वं परं वा न तत्पदं कोऽपि लब्धु समर्थः सञ्जातः।' तथा च वदन्ति वैशिष्ट्यं प्रतिपादयितुं 'कनिष्ठिकाधिष्ठितोऽयम्' इति। ततश्च न तादृशः कोऽपि सञ्जातः। अतएवा-नामिकेति नामापि स्वसार्थक्यं भजते। अपि च कवीनां गणनाप्रसङ्गे यानि यानि विशेषणानि भवितुमर्हन्ति, तानि सर्वाणि न्यूनतामेवावहन्ति। स्वतो विशेषगुणगणसम्पन्नानां महामनसां विशेषणं न तादृशं वैशिष्ट्यमादधाति, यादृशाः गुणास्तत्र विद्यन्ते। इति तु साम्प्रतिकी स्थितिः। परन्तु तेषां समक्षमपि तादृशोऽप्यासीत् कश्चित् कालः, यत्र भणितिरियं तेषामपि तस्मिन् काले एतेऽपि नवीनतामावहन्ति स्म। एतस्मात् पूर्वं प्रथितयशसां भाससौमिल्यकविपुत्रादीनामतीव ख्यातितरासीदिति तत्प्रयुक्तवचनेनैवैतेन प्रतीयते।

अतएव प्रथितयशसामिति शब्दस्य व्यवहारोऽपि संगच्छते आसीदेतादृशोऽपि कश्चित् काल इति। तेषां कविवराणां प्रबन्धानति-क्रम्य वर्त्तमानकवेः कालिदासस्य क्रियायां कथं बहुमान इति। तात्पर्यमिदं प्रतिभाति यत्तस्मिन् काले कालिदासस्य महत्त्वं न किमपि आसीदिति। अतस्तेषां महद् यशसां कवीनां काव्यनाटका-दीनामेव महत्त्वं वर्त्तते। तेषामेव प्रयोगः सामाजिकानां समक्षं समीचीन इति प्रतिभाति। अस्मिन्नेव प्रसङ्गे उक्तिरियं हृदयेन निःसरति। अनेन च हार्दं भावं प्रकटीभवति। **'न साधु सर्वम्'** इति कथनेनेदमपि प्रतीयते यद् पुराणत्व-मेव न साधुत्वप्रयोजकं भवति, साधुत्वप्रयोजकं किमपि भिन्नमपि वस्तु भवति। एवञ्च **'न सर्वम्'** इति कथनेन सर्वेषां न साधुत्वं न वासाधुत्वं भवति। अर्थात् केषुचित् साधुत्वमपि स्थास्यति, असाधुत्वमपि। अनेन च प्रकारेण स्वस्मिन्नपि दार्ढ्यमनुभवति। यद्यप्यहं नवीनस्तथापि न त्याज्यः।

कुत इति चेत्, नवीनत्वमेव न परित्यागहेतुत्वं वर्त्तते। परित्यागप्रयोजकता त्वन्यत्र तिष्ठति। तत्र भवति कोऽपि हेतुः। अनेन च स्वस्मिन् विश्वासोऽभिव्यज्यते। कवि—हृदये नास्ति किमपि भयम्, अपितु भयमिवाभिव्यक्तीकरोति। कविषु दृढता प्रबला वर्त्तते, न किञ्चिदपि संशयः। अतएव गर्वोक्तिरियं **'पुराणमित्येव न साधु सर्वम्'** इति। अहन्तु नवीनः, परन्तु पश्यन्तु भवन्तः, कीदृशोऽयं प्रबन्ध इति। अनवद्यत्वेऽपि न नवीनत्वं हेतुरपि त्वन्यत् किमप्यन्वेषणीयम्। नवीनेऽपि साद्गुण्यसम्भ-वात्। यथास्माकं प्रबन्धः। अतएवायं परीक्षणाय समुद्यतो वर्त्तते। स्वस्मिन् प्रबन्धे निगूहितं तत्त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यतेऽनुभवति च, तदैव कश्चित् परीक्षायै भवति तत्परः । स्वप्रबन्धे सौष्ठवं लालित्यं सर्वपरीक्षकजनसंग्राह्यकत्वञ्च विद्यतेऽतएव विश्वसिति कविः यत् परीक्षा यदि भविष्यति, तर्हि साफल्यं मम पार्श्वे एव समागमिष्यति । परीक्षणानन्तरमेव परीक्षकाः निर्णयं कुर्वन्ति यत् कस्य प्रबन्धस्य साधुत्वं वर्त्तते, कस्य वा नेति । तत एव ग्राह्यत्वाग्राह्यत्वविचारोऽपि प्रवर्त्तते । स्वस्मिन् प्रबन्धे स्वस्यैव नास्ति चेदाश्वासस्तर्ह्यन्यस्य का कथा ? कस्यचित् कथनेन परीक्षां विनैव विश्वासस्तु मौर्ख्यप्रयोजकः । न तत्र वैदुष्यप्रतीतिः । विदुषान्तु, लक्षणमिदमेव यत् स्वयमेव सम्यक् परीक्ष्य ग्राह्यत्वाग्राह्यत्व विवेकः प्रकुर्वन्ति । परकथनमात्रमेवाश्रित्य यदि कश्चिन्निर्णये प्रभवति, तर्हि मौर्ख्यमेव प्रकटीकरोति । न तस्य भिन्नं लक्षणमावश्यकं प्रतिभाति, अपि त्विदमेवेति मन्तव्यम् । तस्मात् परीक्षा कर्त्तव्या । परीक्षणान्तरमेव निर्णय इति स्थितिः । तत्रायं कविः सन्नद्धः । न बिभेति कस्मादपि । अतएव गर्वोक्तिरियमिति निश्चनोमि ।' इति तु तेषां स्थितिः ।

साम्प्रतिके समये ये महाकवयः लब्धप्रतिष्ठाः गीतिकाराः वा विराजन्ते, तेषां का स्थितिरिति विचारणीया । अथवैते एव विचारणीयाः सन्ति । कथं तेषु महाकविषु तादृशं दार्ढ्यमासीत् । सम्प्रति वर्त्तते तस्याभाव इत्यत्र कारणं किम् ? केनापि कारणेन भवितव्यम् । तत्र पर्यालोचनेनेदं प्रतिभाति यत्तत्र कविषु तत्तन्मर्यादा—परिपालनमेव कारणमासीत् । नवीनप्रयोगस्य प्रदर्शनाय न प्राचां मानदण्डानामवहेलनं सहन्ते स्म । यतो हि येन मानदण्डेन प्राचीनानां प्रबन्धनिर्माणं, तेनैव मानदण्डेन यदि नवीनानामपि प्रबन्ध-निर्माणं स्यात्तर्ह्युभयोः परीक्षा सम्भवी । तदैव च सम्यक् तोलनमपि भवितुमर्हति । अन्यथा सतां परीक्षायामुत्तीर्णता संशयास्पदीभूतैव भवेत् । समानतायामेव तोलनं शोभते । प्राचां पाणिनि-प्रभृतीनां वैयाकरणानां पिङ्गलप्रभृत्तीनां छन्दसां निर्मातॄणां भरतमुनिप्रभृतीनां दोषगुणरसादि काव्यतत्त्वानां निर्धारितमानदण्डानां परिपालनमेवापरेषां मर्यादा । कालिदासात् प्राचीनानां काव्यादिनिर्माणे यादृशी मर्यादा आसीत्, तन्मर्यादयैव नवीनानां कालिदासप्रभृतीनां काव्यनाटकादीनां रचना समभूत् । अतएव गर्वोक्तिरपि सङ्गच्छते ।

यदि महाकवेः कालिदासस्य रचना तत्तन्मर्यादा—विहीनैव स्याच्चेत्तर्हि परीक्षकाः प्राचीन—प्रबन्धादीन् परित्यज्य नवीन—प्रबन्धादीनां ग्रहणं न कुर्युः । अतएव कविहृदये दार्ढ्यमपि वर्त्तते । तत्रापीदमेव कारणम् । मर्मादा—परिपालनमेव ग्राह्यत्वाग्राह्यत्वे प्रयोगकम् । नवीनप्रयोगश्च यदि तत्तन्मर्यादा विहीना भवेत्तर्हि चाटुकाराणामेव शोभते, न परीक्षकाणाम् । पश्यन्तु भवन्तुः, न नवोनप्रयोगो दूषणमावहति, यदि सतामाचारानुकूलो भवेत् । सर्वदैव वस्त्रधारणं कृत्वैव समाजे स्थातव्यमित्यास्माकीना वर्त्तते काचिन्मर्यादा । यद्यत्र कश्चिद् विचारयति नूतनं किमपि कर्त्तव्य मिति । वस्त्रधारणन्तु प्राचां व्यवहारोऽतीव प्राचोनः सञ्जातः । तर्हि किं कर्त्तव्यम् ? इति विचार्य दिगम्बरायते सः । तदा केनचित् पृष्ठः सः, किं भो ! एवं कथमाचरति भवान् ? नास्मदीया मर्यादा । तदा सः समुत्तरयति यत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं न जानासि, मूर्खोऽसि । कथमिति चेत्, प्रयोगस्यास्य नूतनत्वात् । नूतनोऽयं प्रयोगः । बहोः कालाद् वस्त्रं धारयन्तः जनाः समागच्छन्ति । किमपि नवीनं भवेत् । अतएव कृतं मया । परन्तु स समाजे न प्रतितिष्ठति, अपि तु समाजे उपहासभाजनतां समवाप्नोति । उन्मत्तोऽयं मूर्खोऽयं मर्यादाभञ्जकोऽयमिति कथयन्ति जनाः । एतादृशस्य जनस्य प्रबन्धस्य वा तोलनं न प्राचीनैः सह भवति, न वा तेषु दाढ्यं भवति परीक्षायै । अतो नैतत् कर्त्तव्यम् । यादृशी मर्यादा प्राचां वर्त्तते, तस्याः परिपालनपूर्वकं कश्चिद् यदि नवीनतामादधाति, तर्हि स पूजायोग्यो भवति । इयमेव चास्माकं मर्यादा । पश्यन्तु भवन्तः श्रीमन्तः । पाणिन्युपज्ञं व्याकरणमिति कथयन्ति जनाः । तैश्च सूत्राणि विरचितानि तान्येव सूत्राण्यधिकृत्य वार्त्तिकानां संरचना सञ्जाता । सापि उक्तानुक्तदुरुक्तचिन्ता करणात्मिका केषुचित् सूत्रेषु काचिन्न्यूनता प्रतीति-स्तासां निराकरणायापि कृतप्रयत्नाः सन्ति वार्त्तिककाराः । एवमेव महाभाष्यकारोऽपि सूत्राणां सुसूक्ष्मं विवेचनं प्रस्तौति तथा सम्पूर्ण-मपि सूत्रं कुत्रचिदन्यासिद्धमिति प्रतिपादयति । तत्सर्वं कृत्वापि न महर्षेः पाणिनेः न्यूनता-प्रख्यापनं करोति, अपितु वैशिष्ट्यमेव प्रतिपादयति । स्वयमेव कथयति महाभाष्यकारः यत् **'वर्णेनाप्यनर्थकेन न भवतिव्यं, किमियता सूत्रेण'** इति ।

एवं पुनश्च तेषां सार्थक्यमपि प्रतिपाद्य मर्यादापरिपालनं करोति । येषाञ्च सूत्राणां दृष्टं प्रयोजनं किमपि न प्रतीयते । तेषामप्यदृष्टार्थं विशिष्टं प्रयोजनं प्रतिपाद्य तेषां सार्थक्यप्रतिपादनं करोति । परवर्त्तिनश्चाचार्याः एवमपि प्रतिष्ठापयति यत् **'सूत्रेष्वेव हि तत्सर्वं यद् वृत्तौ यच्च वार्त्तिके'** इति । अनेन च सूत्रकारस्य सुमहत्त्वं प्रख्यापितं भवति । तत्र च मर्यादासंरक्षणमेव सुमहत्कार्यं, तदेव च प्रयोजनम् । ननु सूत्र-कारस्यैतादृशं महत्त्वं वर्वर्त्ति, तर्हि खण्डनस्यैव किं प्रयोजनमिति चेत्, न । शिष्यबुद्धिवैरा-द्यर्थात्तस्य । विचारस्यैका सरणीयमपि वर्त्तत इति प्रदर्शनार्थं तस्यापि सप्रयोजनत्वम् । स्वकीयं विचारं प्रस्तोतुं स्वतन्त्राः सन्ति सर्वे । परन्तु मर्यादारक्षणमप्यावश्यकम् । अन्यथा विचारस्य निरङ्कुशत्वमेव स्यात् । तथा चाप्रामाण्याप्रामाण्यव्यवस्थापि न स्यात् । एवमेव भक्तिरसनिरूपणप्रसङ्गे भक्तेरपि रसत्वं सुसाधितं पण्डितराजेन, तथापि स्व-सिद्धान्तप्रतिपादनसमये कथयति यत् विचारस्यैष पन्था वर्त्तते, तथापि नैतत् करणीयम् । कुत इति चेत्, मुनिवचनभङ्गापत्तेः । भरतमुनेस्तत्र तात्पर्यं नास्ति । अतएव नायं सिद्धान्तः स्वीक-रणीय इति । एवमेवान्यत्रापि द्रष्टुं शक्यते । तस्मान्मर्यादाश्रित्यैव यत् किमपि वक्तव्यम्, लिखितव्यमिति वर्त्ततेऽस्माकं प्राचीना परम्परा ।

सम्प्रति दरीदृश्यते यत् व्याकरणशास्त्रीयं नियमं छन्दःशास्त्रीयनियमं वोलङ्घ्य लेखने काव्यनिर्माणे गीतिनिर्माणे वा प्रवर्त्तन्ते जनाः । तत्र च गर्वमनुभवन्ति, कथयन्ति च नूत्नेयं विधा । न केनापि पूर्वमाश्रिता । स्वप्रामान्याय च पुरातनं वाक्यं पौनःपुण्येनोदाहरन्ति यत् **'पुराणमित्येव न साधु सर्वम्'** । परन्तु तेषां परम्परां न पालयन्ति । ये खलु कथयितार आसन्, ते परम्परावादिनः आसन्, न तु परम्परामुल्लङ्घ्य वर्त्तन्ते स्म । तस्माल्लेखने व्याकरणनियमानां छन्दसां नियमानाञ्च पालनमवश्यमेव कर्त्तव्यम् । अन्यथा शास्त्रीयमर्यादाया उच्छेदापत्तिः स्यादिति दिक् । ★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोऽयम् ?

— डॉ० मनोहरलालः आर्यः संस्कृतविभागाध्यक्षः
डी० ए० वी० महाविद्यालयः, कांगड़ा (हि० प्र०)

(१)

बाहुद्वयोऽपि नो शक्तः कार्यं कर्तुं तु किञ्चन ।
सता नेत्रद्वयेनापि द्रष्टुं न तेन शक्यते ॥

(२)

मुखे सुविद्यमानेऽपि नासौ किमपि खादति ।
प्रसक्तौ चरणौ तस्य गन्तुं प्रभवतो न हा ! ॥

(३)

गृहस्वामी वसन् गेहे सुप्रियः स्वजनोऽपि सन् ।
आत्मीयैः स्नेहिभिर्गेहात् किन्नु निःसार्यते बहिः ॥

(४)

जनाकीर्णोऽपि नो हृष्टो दुःखितश्चापि लक्ष्यते ।
निःसन्तापोऽपि सन् चाशु तापापेक्षी मतो जनैः ॥

(५)

यद् रूपत्वं न वाञ्छामो वयं भीमं कदाचन ।
तद् रूपत्वं प्रलप्स्यामश्चावश्यं वयमेव हा ! ॥

(६)

जलार्थी नैष नीराणि वयं तस्मै प्रदद्महे ।
घृतादि नेहते खाद्यं बलाद् दद्मश्च तन्मुखे ॥

(७)

अभिलाषा च वस्त्राणां तस्य नैवास्ति काचन ।
बलात् तस्मै सुवासांसि समर्पयन्ति मानवाः ॥

(८)

सदसच्छ्रवणेहा वा तस्य लुप्ता निसर्गतः ।
वयं तस्य शिरोभागे कुर्महे शास्त्रकीर्तनम् ॥

(९)

स्पर्शेन कण्टकस्यापि चक्रन्दासौ कदाचन ।
नो जहात्यधुना मौनं दाहे क्लिष्टे प्रपीडने ॥

(१०)

जुगोपात्मानमाक्रान्तो मक्षिकादंशकैरपि ।
चेदद्य खण्डने हन्त ! औदासीन्यं दधात्यसौ ॥

(११)

आनुकूल्ये जहर्षासौ प्रातिकूल्ये प्रचिक्लिशे ।
इष्टानिष्टेषु नेदानीं हा ! हृष्यति न दूयते ॥

(१२)

सुगन्धाकाङ्क्षिघोणोऽसौ दुर्गन्धात् प्रजुगुप्सितः ।
सदसद्गन्धविज्ञानात् साम्प्रतं प्रच्युतः कथम् ॥

(१३)

अल्पैः शब्दैर्दृढा निद्रा लुलोपास्य चुकोप सः ।
भेरीनादास्तु तन्निद्रां भेत्तुं नालं बलादपि ॥

(१४)

सेतुः सहिष्णुतायाश्च तुत्रोट यस्य कोटिशः ।
सर्वंसहो महीवासौ ब्रूते नाद्य समाधिवान् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

BHARATODAYA
R N.I. Regd No. UPBIL/1998/1485 Postal Regd. No. UA/DN-73/2002

(१५)

लोकाज्जिह्राय यः पूर्वं भावैरल्पतरैरपि ।
स्नायते नग्नको लोकैः क्व तद् व्रोडा निलीयते ॥

(१६)

वित्तोपार्जनसंलग्नं कालाभावस्तुतोद यम् ।
विगतार्थस्पृहस्याद्य कालोऽखिलो न मूल्यवान् ॥

(१७)

वित्तहेतोर्विमूढात्मा नाभैषीन्मरणादपि ।
लुण्ठेत् कोऽप्यखिलं तत्स्वं नाद्य खिन्ते न चेष्टते ॥

(१८)

सत्यं कदाप्यसत्यं वा स्वार्थलिप्तो जगाद यः ।
सद्भसद्भ्यां विरक्तोऽद्य मूकोऽयं बधिरायते ॥

(१९)

वाहनारोहणेच्छा वा तस्य कापि न विद्यते ।
चत्वारो वयमामिल्य स्कन्धेषु तं वहामहे ॥

(२०)

चत्वारश्चालका यस्य चतुष्पाद् नासौ च चाध्वरः ।
रोदयन्नखिलान् लोकान् स्वयं रोदिति नैष हा ! ॥

(२१)

श्रेष्ठी योगी बुधो मूढः साक्षरो वा निरक्षरः ।
स्वस्थोऽस्वस्थश्चलो धीरः सत्यनिष्ठः कृशो बली ।

(२२)

बालो वृद्धो युवा नारी नरो वा सज्जनः खलः ।
सः तौ ते वाथ सा ते ताः तत् ते तानि च कान्यपि ॥

हरिद्वारस्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः (संस्कृत-मासिकम्)
P. O. गुरुकुलमहाविद्यालयः २४६४०५
हरिद्वारम् (उत्तराञ्चलम्)

सेवायाम्,
श्री—....

२५० श्री पुस्तकालयाध्यक्ष
वाल्मीकि संस्कृत विद्यापीठ
प्रदर्शनी मार्ग,
काठमाण्डू (नेपाल)

(२३)

अहमावां वयं वापि यूयं त्वं वा युवामपि ।
तदवस्थामवाप्स्यामो वयं सर्वेऽनिवार्यतः ॥

(२४)

पाठं पाठमिमं लेखं भवन्तश्च मनीषिणः ।
संचिन्त्य मनसा नूनं कोऽयं कोऽयं ब्रुवन्तु भो ॥

(२५)

कोऽयं कोऽयं भवन्तश्चेन्नो विदुः शृणुयुस्तदा ।
मृत्युं गतः शवोऽसौ भो ! सत्यं तथ्यं विजानताम् ॥

मुद्रकेण, प्रकाशकेन डॉ० हरिगोपालशास्त्रिणा ज्वालापुरीये 'अनुभव प्रिंटिंग प्रेस' मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं मुखपत्रं प्राकाश्यं नीतं हरिद्वारस्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालयसभया ।

सम्पादकः डॉ० हरिगोपालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu